"तादृशोऽहति तत्तस्मिन् वीजं स्वैर्व्यञ्जितं गुणैः" मनुः।

**तान** पु० तन—घञ्। १विस्तारे अवतानः सन्तानः। "मूर्वा गुडूचीतानैराभीव्येत्" सुश्रुतः। २ज्ञानविषये शब्दार्थकल्प० ३गानाङ्गभेदे। "विस्तार्य्यन्ते प्रयोगा ये मूर्च्छना शेष-संश्रयाः। तानास्तेऽप्यूनपञ्चाशत् सप्तस्वरसमुद्भवाः। तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक्। ते स्युः पञ्च सहस्राणि त्रयस्त्रिंशत् शतानि च" सङ्गी० दा० "तानप्रदायित्वमिवोपगन्तुम्" कुमा०। "गाता यं यं स्वरं गच्छेत् तं तं वंशेन तानयेत्" मल्लिनाथधृतम्। "गायन्ति दिव्यतानैस्ते भा०स०४अ०।

**तानव** न० तनोर्भावः पृथ्वा० पक्षे अण्। तनुत्वे "तानवं तनुता गात्रे दौर्बल्यभ्रमणादिकृत्" उज्ज्वलमणिः "अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात् कुतः" अमरः।

**तानव्य** पुंस्त्री तनोरपत्यं गर्गा० यञ्। तनोरपत्ये स्त्रियां लोहि० ष्फ षित्त्वात् ङीष्। तानव्यायनी।

**तानूनप्त्र** न० तानूनप्त्रा देवताऽस्य अण्। तनूनप्तृदेवताके पृषदाज्ये "तानूनप्त्रं गृह्णामि कांस्ये चमसे वा" मानवसू०। "तानूनप्त्रमेतत्" कात्या० श्रौ० ८।१।२४। "एतदाज्यं तानूनप्त्रसंज्ञं भवति" कर्कः। "तदेतत्तानूनप्त्रं निदानेन" शत० ब्रा० ३।४।२।८ "तानूनप्त्रा च प्रजापतिः वायुर्वा" तनूनप्तृशब्दे दृश्यम्। [त्रिका०।

**तानूर** पु० तन—वा० ऊरण्। पयसां स्वतोभ्रमे आवर्त्ते

**तान्त** त्रि० तम—क्त। १ग्लाने २क्लान्ते च। शब्दार्थकल्प०। "मृदुलतान्तलतान्तमलोकयत्" "रतिरभसविलासाभ्यास-तान्तं न यावत्" माघः। "अलसतान्ततारकेण" दश-कुमा०।

**तान्तव** न० तन्तोर्विकारः अञ्। वस्त्रे "मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च" "सर्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च" मनुः।

**तान्तव्य** पुंस्त्री तन्तोः सन्तानस्यापत्यं गर्गा० यञ्। तन्तोरपत्ये स्त्रियां लोहिता० ष्फ षित्त्वात् ङीष्। तान्तव्यायनी।

**तान्तुवायि** पुंस्त्री तन्तुवायस्यापत्यं "उदीचामिञ्" पा० इञ्। तन्तुवायस्यापत्ये। अन्यमते "सेनान्तलक्षणकारिभ्यः" पा० ण्य। तान्तुवाय्य तदर्थे।

**तान्त्रिक** त्रि० तन्त्रं सिद्धान्तं वेत्ति शास्त्रमधीते वा उक्था० ठक्। १ज्ञातसिद्धान्ते २शास्त्राभिज्ञे च "एवं प्रयत्नवैविध्यं तान्त्रिकैः परिकीर्त्तितम्" भाषा० तन्त्रे विहितः ठक्। ३तन्त्रविहिते त्रि० स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः" तन्त्रम्। इदमर्थे ठञ्। ४शास्त्रसम्बन्धिनि च। अथातो धर्म्मं व्याख्यास्यामः श्रुतिप्रमाणको धर्म्मः श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च" हारीतः।

**तान्दुर** न०तन्दुरेण पाकयन्त्रभेदेन निर्वृत्तम् अण्। तन्दूरपक्वे मांसभेदे तत्पाकविधिः शब्दार्थचि० धृतवाक्ये यथा "अङ्गारपूर्णगर्त्ते यदलग्नमवलम्बितम्। संस्कृतं पिहितं मांसं पक्वं तान्दुरमुच्यते" सुस्वादु तान्दूरन्तु। "पचेद्गर्त्तेऽन्तरीक्षस्थं लम्बि सम्भारसम्भृतम्। चतुर्दिङ्-मण्डलाकारं पार्श्वप्रज्वलितानले। विपक्वं सुरभि स्वादु तान्दूरमिति कीर्त्तितम्। अन्यच्च। "कोष्ठिकायां सुसम्भारमलग्नमवलम्बितम्। मांसं पिधाय बाह्याग्नि-ज्वालया स्वेदितम् वरम्। तान्दूरं रुचिदं बल्यं मृदु पथ्यतमं स्मृतम्। सद्योहृतं नवं स्थूलमन्यथा दोषकारणमिति"।

**तान्व** पु० तन्वाः प्राणाधिष्ठितत्वात् प्राणवत्या अयम् "प्राणिरजतादिभ्योऽञ्" पा० अञ् संज्ञापूर्वकविधेरनित्यत्वात् वेदे न गुणः। तनूजे पुत्रे। "न जामये तान्वारिक्थम्" ऋ० ३।३१।२। तनुनामकस्य ऋषेरपत्यम् प्राणित्वात् अञ् पूर्ववद्गुणाभावः। २ऋषिभेदे। "सद्यो विदिष्ट तान्वः" ऋ० १०।९४।१५। तान्वो नामर्षिः" भा०। तनु दशापवित्रवस्त्रम् तस्येदम् अण् पूर्ववद्गुणाभावः। ३दशापवित्रवस्त्रसम्बन्धिनि "जहद्धर्म्माणि तान्वा" ऋ० ९।१४।४। "तान्वा तान्वानि छान्दस आच्" भा०। स्वार्थे अण्। ४दशापवित्रवस्त्रे च। "गृभ्णाति रिप्रं विरस्य तान्वा" ऋ०९।७८। "तान्वा स्वकीयेन वस्त्रेण" भा० पूर्ववत् तृतीयास्थाने आच्।

**ताप** पु० तप—घञ्। क्लेशजनके उष्णादिस्पर्शजन्ये १सन्तापे २कष्टे च मेदि०। "निदाघकालोल्बणतापयेव" कुमा०। "करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" मनुः।

**तापक** त्रि०तापयति तापि—ण्वुल्। १तापकारके २ज्वरे पु० शब्दर०। ३रजोगुणे च तथ्यं सत्त्वं तापकं रजः सा० शास्त्रे प्रसिद्धम्। "सत्त्वं तथ्यं बुद्धिभावेन वृत्तं भावाये वा राजसास्तापकास्ते। तथ्या भेदग्राहिणी तामसी या वृत्तिस्तस्यां तथ्य इत्युक्त आत्मेति" सर्वद०।

**तापत्य** पुंस्त्री तपत्याः सूर्य्यकन्यायाः अपत्यम् क्षत्रियत्वात्